**સદાશિવ કવચં**

શ્રી ગણેશાય નમઃ

શ્રી દેવ્યુવાચઃ-
ભગવન્ દેવદેવેશ સર્‌વ્વામ્નાય પ્રપૂજિત
સર્‌વ્વં મે કથિતં દેવ કવચં ન પ્રકાશિતં 1

પ્રસાદાખ્યસ્ય મન્ત્રસ્ય કવચં મે પ્રકાશાય
સર્‌વ્વરક્ષાકરં દેવ યદિ સ્નેહો/સ્તિ માં પ્રતિ 2

શ્રી ભગવાનુવાચઃ-
પ્રસાદમન્ત્રકવચસ્ય વામદેવ ઋષિઃ
પંક્તિશ્ચન્દઃ સદાશિવો દેવતા
સકલાભીષ્ટ સિદ્ધયે જપે વિનિયોગઃ

શિરો મે સર્‌વ્વદા પાતુ પ્રસાદાખ્યાઃ સદાશિવઃ
ષડક્ષરસ્વરૂપો મે વદનં તુ મહેશ્વરઃ 3

પઞ્ચાક્ષરાત્મા ભગવાન્ ભુજૌ મે પરિરક્ષતુ
મૃત્યુઞ્જયસ્ત્રિબીજાત્મા આસ્યં રક્ષતુ મે સદા 4

વટમૂલં સમાસીનો દક્ષિણામૂર્‌ત્તિરવ્યયં
સદા માં સર્‌વ્વદઃ પાતુ ષટ્ત્રિંશાર્‌ણસ્વરૂપધૃક્ 5

દ્વાવિંશાર્‌ણાત્મકો રુદ્રો દક્ષિણઃ પરિરક્ષતુ

ત્રિવર્ણણાત્મા નીલકણ્ઠઃ કણ્ઠં રક્ષતુ સર્વ્વદા 6

ચિન્તામણિર્બીજરૂપો હર્દ્ધનારીશ્વરો હરઃ
સદા રક્ષતુમે ગુહ્યં સર્વ્વસન્પત્પ્રદાયકઃ 7

એકાક્ષરસ્વરૂપાત્મા કૂટવ્યાપી મહેશ્વરાઃ
માર્ત્તાણ્ડભૈરવો નિત્યં પાદૌ મે પરિરક્ષતુ 8

તુંબુરાખ્યો મહાબીજસ્વરૂપસ્ત્રિપુરાન્તકઃ
સદા માં રણભૂમૌ ચ રક્ષતુ ત્રિદશાધિપઃ 9

ઊર્દ્ધ્વમૂર્દ્ધાનમીશાનો મમ રક્ષતુ સર્વ્વદા
દક્ષિણાસ્યં તત્પુરુષઃ પાયાન્ મે ગિરિનાયકઃ 10

અઘોરાદ્યો મહાદેવઃપૂર્વ્વાસ્યં પરિરક્ષતુ
વામદેવઃ પશ્ચિમાસ્યં સદા મે પરિરક્ષતુ 11

ઉત્તરાસ્યં સદા પાતુ સદ્યોજાત સ્વરૂપધૃક્
ઈત્થં રક્ષાકરં દેવિ કવચં દેવદુર્લ્લભં 12

પ્રાતઃકાલે પઠેત્ યસ્તુસો / ભીષ્ટં ફલમાપ્તયાત્
પૂજાકાલે પઠેત્ યસ્તુ કવચં સાધકોત્તમઃ 13

કીર્ત્તિશ્રીકાન્તિમેધાયુઃ સહિતો ભવતિ ધ્રુવં
કણ્ઠે યો ધારયેદેતત્ કવચં મત્સ્વરૂપકં 14

યુદ્ધે ચ યજમાપ્નોતિ દ્યુતે વાદે સ સાધકઃ
કવચં શારયેભ્યસ્તુ સાધકો દક્ષિણેભુજે 15

દેવા મનુષ્યા ગન્ધર્વ્વા વશ્યાસ્તસ્ય ન સંશયઃ
કવચં શિરસા યસ્તુ ધારયેદ્ યતમાનસઃ 16

કરસ્થાસ્તસ્ય દેવેશી અણિમાદ્યષ્ટ સિદ્ધયઃ
ભૂર્જ્જપાત્રે ત્વિમાં વિદ્યાં શુક્લપટ્ટેન વેષ્ટિતાં 17

રજતોદરસંવિષ્ટાં કૃત્વા વા ધારયેત્સુધીઃ
સન્પ્રાપ્ય મહતિં લક્ષ્મીમન્તે મદ્દેહરૂપભાક્ 18

યસ્મૈ કર્મૈ ન દાતવ્યં ન પ્રકાશ્યં કદાચન
શિષ્યાય ભક્તિયુક્તાય સાધકાય પ્રકાશયેત્ 19

અન્યથા સિદ્ધિહાનિઃ સ્યાત્ સત્યમેતન્મનોરમે
તવ સ્નેહાન્મહાદેવિ કથિતં કવચં શુભં 20

ન દેયં કસ્યચિદ્ ભદ્રે યદીચ્છેદાત્મનોહિતં
યોર્ચ્ચયેદ્ ગન્ધપુષ્પાદ્યૈઃ કવચં મન્મૌખોદિતં 21

તેનાર્ચ્ચિતા મહાદેવિસર્વ્વે દેવા ન સંશયઃ

(ઈતિ ભૈરવતન્ત્રે સદાશિવકવચં સંપૂર્ણં) ver 0.1